सं. १३८० मार्ग सु. ७ शुक्रे श्रे. जेसपाल भा. जयतलदे पुत्र जगपालेन मातृ-पितृ-श्रेयसे निमित्ते श्रीपार्श्वनाथबिंबं कारितं प्र. श्रीदेवेन्द्रसूरीणामुपदे ....

४९ (१४६६)

सं. १३८० वर्षे मार्ग. सुद ६ सोमे प्रागवाटज्ञातीय .... श्रेयोर्थं पुत्र गोदाकेन श्रीआदिनाथबिंबं का. प्र. श्रीपद्मदेवसूरिभिः ।।

५० (१३४३)

सं. १३८१ वर्षे वै. सु. १ रवौ धारणउद्रीयागच्छे श्रीमालज्ञातीय ठ. सजल भा. सिंगारदेविश्रेयसे सु. कम्र्मकेन श्रीआदिनाथबिंबं का. प्र. श्रीहरियेंद्रसूरिभिः ।।

५१ (१११५)

सं. १३८१ वर्षे वै. सु. १४ गुरौ श्रीमालज्ञातीय पितृ श्रे. सोमा .... श्रीशांतिनाथबिंबं का. प्रति. श्रीरत्नप्रभसूरीणामुपदेशेन कारितं प्रति. श्रीसूरिभिः ।।

५२ (५६५)

सं. १३८५ वर्षे फागुण सुद ८ श्रे. धरणा ठा. भरणकू.................................
आसपालेन श्रीआदिनाथबिंबं का. प्र. श्रीरतनागरसूरिभिः ॥

५३ (१६१)

सं. १३८६ व्य. पूना भा. नायक व्य. मना भा. माल्हणदेवि पुत्र जहजकेन श्रीशांति-नाथबिंबं कारितं प्रतिष्ठितं कनुड़ (?) श्रीजयदेवसूरिभिः ॥

५४ (४६५)

सं. १३८६ वैशाख वदि.................. शनौ षडायदा..
राजपाल..................................श्रेयसे श्रेष्ठि तेजःपालेन श्रीपार्श्वनाथबिंबं कारितं प्रति. श्रीगोविंदसूरिभिः शुभं भवतु ॥

५५ (६८३)

सं. १३८७ वर्षे माघ सुद ५ सोमे प्राग्वाटज्ञातीय जल्हेण भा. सहजलश्री सुत पीतृ-णेण (?) श्रीशांतिबिंबं का. प्र.

५६ (१०५६)

सं. १३८८ वर्षे ज्येष्ठ व. ११..
सुत सोहाकेन पु. भीमासहितेन मातृ-पितृश्रेयसे श्रीआदिनाथबिंबं का. प्र. श्रीजगतिलक-सूरिभिः ॥

५७ (१०६२)

सं. १३८६ मार्गवदि ४ शनौ सखं (?) सुत..
पितृ.................................. युतेन हेमराजयुतेन श्रेयसे श्रीआदिनाथबिंबं का प्र. श्री व. पट्टे श्रीगुणचंद्रसूरिभिः ॥

५८ (६१३)

सं. १३६० वर्षे पोस वदि २ चैत्रगच्छे भतृपुरज्ञा. सा. वाला भार्या भाढी पुत्र पजो (?) भा. लाडी पतरसी (?) माता-पिताश्रेयोर्थं त्रीमटावी (?) उप. श्रीराजचंद्र-सूरिभिः ॥

५९ (१०६१)

श्रीशांतिनाथ १६ सं. १३६२ माह श्रीप्रतापसिंघजी भार्या..............................
कारापितं.................................. श्रीसागरचंद्रप्रति.

६० (१६५८)

सं. १३६२ माह सु. १२ सा. मालूण भा...

श्रीपार्श्वनाथबिंबं प्रति. श्रीकक्कसूरिभिः

६१ (८००)

सं. १३६२ वर्षे माह वदि ५ मघरा (?) शा...

६२ (७६७)

सं. १३६२ महा आगड बु (?) वीमलआमसीह (?) का. प्र. म ह श्रीशांतिसूरि

६३ (१६१६)

सं. १३६४ वै. सु. १०...सहितेन श्रीपार्श्वनाथबिंबं का. प्र. उपकेशगच्छे श्रीदेवगुप्तसूरिभिः

६४ (२८)

सं. १३६४ वर्षे वैशाख वदी १० गुरौ पाना भार्या हासलदे पुत्र कालाकेन मातृ-पितृश्रेयोर्थं श्रीधर्मनाथ. प्रति. कारि. श्रीदेवसूरि...

६५ (५७५)

सं. १३६७ वर्षे वै. सुद २ श्रीगूजरज्ञातीय अनगपाना (?) मं. जमा-सिह (?) सुत हिपाकेन श्रीपार्श्वनाथबिंबं कारितं

६६ (८८३)

सं. १३६८ चैत्र वदि ६ प्रागवाट...पितृमह मुलु श्रेयसे श्रीमहावीरबिंबं...रि श्रीराजशेखरसूरिभिः ॥

६७ (८८६)

सं. १३.......... ज्येष्ठ सुद १ शुक्रे...

६८ (५५६)

सं. १४०४ वर्षे माह सुद ८ शनौ प्राग्वाटज्ञातीय व्य. लाखा सुत व्य. हेमाकेन भार्या व्य. हमीरदे श्रेयोर्थं श्रीमहावीरबिंबं का. प्र. श्रीसूरिभिः ॥ शुभं भवतु ॥

६६ (६२७)

सं. १४०४ वर्षे वैशाख सुद १२ शुक्रे श्रीमालज्ञातीय व्य. बीजल मातृ वयजलदे सुत सातसीह (?) हीरा सी (?) निमित्तं सुत जाणाकेन पंचायतनं श्रीपार्श्वनाथबिंबं का प्र. श्रीधनेश्वरसूरिभिः ।।

७० (१५५५)

सं. १४०५ वर्षे वैशाख ······ ···श्रेयसे श्रीआदिनाथबिंबं का. श्रीविद्याकरसूरीणामुपदेशेन प्रतिष्ठितं

७१ (१०५१)

सं. १४१२ वर्षे ज्येष्ठ सुद १३ गुरौ प्रा. श्रे. खेता भार्या मड़णल पुत्र लखमसीहेन भा. लखमादेसहितेन पित्रोः श्रे. श्रीआदिनाथबिंबं का. प्रति.

७२ (१०८४)

सं. १४१२ वर्षे ज्येष्ठ सुद १३ गुरौ नायकगोत्रे ठ. प्रतापसिंह पु. भाडा भा. पद्मल पुत्र नयणाकेन पितृश्रे. श्रीमहावीरबिंबं का. प्र. श्रीचैत्रगच्छे श्रीज्ञानचंद्रसूरिभिः ।।

७३ (७५४)

सं. १४१३ वर्षे ज्येष्ट वदि ७ श्रीमालज्ञा. हीरा भार्या वील्हणदे निजश्रेयसे सुतधीणाकेन श्रीसंभवनाथबिंबं का. प्र. श्रीहर्षतिलकसूरीणामुपदेशेन

७४ (१३७०)

सं. १४१७ वर्षे ज्येष्ठ सु. ········· शुक्रे प्राग्वाट ज्ञा. दोसी ··· ······· ······· ········ श्रीमुनिसुव्रतबिंबं का. प्र. श्रीधर्मतिलकसूरिभिः ।।

७५ (१६६)

सं. १४१७ वर्षे··················· सुदि ६ गुरौ प्राग्वाटज्ञातीय पितृव्य धाराश्रेयोर्थं सुत ठ. म्र ················· नेन श्रीआदिनाथबबं कारितं प्रतिष्ठितं श्रीचैत्रगच्छे श्रीमानदेवसूरिभिः ।।

७६ (१५५४)

सं. १४२० वैशाख सुदि ··· ··········महिपाल भा. वीह्लदेव सुत कुराकेन प्रितृभ्रातृ ················ श्री पार्श्वनाथबिंबं का. प्र. श्रीदेवचंद्रसूरिभिः

७७ (११०६)

सं. १४२१ वर्षे वै. व. ५ शनौ सातले (?) ज्ञातीय भ्रातृ साजण-भार्यासूहवदेश्रेयसे भ्रातृजयतसीहेन पंचायतेन (?) श्रीनमिनाथबिंबं का. प्रति. हीऊरगच्छे (?) पद्मुम्न-सूरिभिः ॥

७८ (१०६३)

सं. १४२१ वर्षे वै. व. ५ प्राग्वाटज्ञातीय श्रे. सोमा भा. सहजलदे श्रेयोर्थं सु. घोषा-केन श्रीशांतिनाथबिंबं का. प्र. सिद्धांतिकश्रीज्ञानचंद्रसूरिभिः

७९ (७६१)

सं. १४२१ वर्षे ज्येष्ठ वदि ७ शनौ श्रीमालज्ञातीय श्रे. समर भार्या. सूमलदे सुत श्रे. मेघा भार्या मेघादे सु. श्रे. वीसल भ्रातृ राणा-भोजा-स्वपित्रोः स्वस्य श्रेयसे आगमगच्छेश-श्रीजयानंदसूरीणामुपदेशेन श्रीविमलनाथबिंबं का. प्र. श्रीसूरिभिः

८० (१६४)

सं. १४२२ वर्षे वैशाख सुदि ५ गुरौ श्रीब्रह्माणगच्छे श्रीश्रीमालज्ञातीय मातृ पुंजी-श्रेयसे सुत धणसीहेन श्रीपार्श्वनाथ. कारितं प्र. श्रीवृध्दिसागरसूरिभिः

८१ (१४२३)

सं. १४२२ वर्षे श्रीअंबिकामूर्तिः शा. ठीजड पुत्र शा. अर्जुन का.

८२ (६६०)

सं. १४२४ आसाड सुदि ६ गुरौ ओसवालज्ञातीय व्यव. लूणा भार्या लूणादेवि पुत्र नरसीहेन स्वपितृ श्रेयसे श्रीशांतिनाथबिंबं का. श्रीपूर्णिमा. श्रीहरिषेणसूरीणामुपदेशेन प्रति. सूरिभिः

८३ (३०१)

सं. १४२४ वर्षे .... श्रीमालज्ञातीय ....
केन श्रीवासुपूज्यबिंबं कारितं प्र. आ. अभयसिंहसूरिभिः ॥

८४ (६५२)

सं. १४२६ वर्षे द्वि. वै. सुद १० रवौ प्राग्वाटज्ञा. वहीआ वस्ता भा. नामलदे पुत्र भमलाकेन मातृ-पितृश्रेयोर्थं श्रीआदिनाथबिंबं का. साधुपू. श्रीपासचन्द्रसूरीणामुपदेशेन प्रति. श्रीसूरिभिः ॥

८५ (६१५)

सं. १४२७ वर्षे ज्येष्ठ सुद १५ शुक्रे श्रीभावकरेण (?) उपकेशज्ञा. श्रे. पितृ वरपाल भार्या वीह्लणदे पितृमातृवीकमदेश्रेयोर्थं पूताजाभ्यां (?) श्रीपद्मप्रभपंचतीर्थी का. प्र. श्रीजिनदेवसूरिभिः ॥

८६ (३५५)

संवत १४२८ वर्षे पोस सुदि ७ श्रीमालज्ञातीय गांधी पदम भार्या सिंगया (?) देवि-श्रेयसे सुत-यताक (?) श्रीमहावीरबिंबं कारितं प्रतिष्ठितं श्रीसूरिभिः ॥

८७ (६१४)

सं. १४२८ वर्षे ... ...७ रवि दिने प्रागवाटज्ञा. सा. नयणा भा. नयणादे पुत्र ... .केन मातृ-पितृश्रेयोर्थं श्रीआदिनाथ. का. प्र. ग. भ. श्रीउदयप्रभसूरिभिः ॥

८८ (१२४)

संवत् १४३० वर्षे माघ वदी २ सोमे श्रीवृद्धायर(?)गोत्रे सा. धरणा भार्या. जिहुणदे पुत्र सा. सहदेवेन श्रेयोर्थं श्रीआदिनाथबिंबं का. प्र. श्रीसागरचंद्रसूरिभिः ॥

८९ (११४४)

सं. १४३२ वर्षे फा. सुद २ शुक्रे श्रीप्रागवाटज्ञातीत व्य. देसत भा. देल्हणदे पु. पूना-केन श्रीपार्श्वनाथबिंबं पंचतीर्थी पित्रोः श्रेयसे कारिता प्रति. मेरडी (?) श्रीविजयसिंह सूरिभिः ॥

९० (५१९)

संवत् १४३२ वर्षे फा. सु. २ शुक्रे प्रा. ज्ञा. .... पुत्र वाढाकेन पित्रो श्रे. श्रीपार्श्वनाथबिंबं म. गच्छे श्रीहरिभद्रसूरिभिः प्रतिष्ठितं ॥

९१ (११२७)

सं. १४३२ वर्षे वै. सुद गुरौ प्राग्. .... भार्या विजलदे पु. जहाकेन पित्रोः पितामह ... .श्रीधर्मनाथबिंबं का. साधु पु. श्रीपार्श्वचंद्रसूरी-णामुपदेशेन प्रति.

९२ (३१)

संवत् १४३३ वर्षे कार्तिक ८ सु. ... . श्रे. विक्रम तवरसंघ कारितं

९३ (८६५)

सं. १४३३ वर्षे वै. सु. ९ शनौ श्रीमालज्ञातीय पितृमातृ थोनातिलदे सुतन्ती (?) पित्रोः श्रे श्रीशांतिनाथबिंबं का. प्र. पिप्पलगच्छे श्रीजयतिलकसूरिभिः ॥

९४ (४६५)

सं. १४३३ वर्षे वै. वदी ११ सोमे प्राग्वाटज्ञातीय ग. मांगा .... पुत्र सायरेन पितृश्रेयसे श्रीपार्श्वनाथबिंबं का. प्र. श्री .... गच्छे श्रीविनयचंद्रसूरिभिः ॥

९५ (१२६४)

सं. १४३४ वर्षे .... श्रेयो श्री ....

९६ (१०४)

सं. १४३५ वर्षे माह वदी १३ सोमदिने वडकूरण (?) गोत्रे ज्ञाती तेरागोष्टीक (?) श्रीनाणकीयगच्छे व्य. झवरा सहिता (?) सोहग पुत्र महं देदा भा. आत्मश्रेयोर्थं श्रीपद्म-प्रभचतुर्विशति जिनालयं कारापितं प्रतिष्ठितं श्रीधनेश्वरसूरिभिः

९७ (१७३६)

सं. १४३७ वर्षे वैशाख वदि १३ सोमे प्राग्वाटज्ञातीय श्रेष्ठि खंडित (?) सावलदे पुत्र भोजा .... आत्मनिमित्तं ... .
श्रीमडाहडीयगच्छे श्रीप्रतिष्ठितं श्रीपासदेवसूरिपट्टे श्रीसोमसूरिभिः

९८ (१७६)

संवत् १४३८ वर्षे वैशाख सुदि २ प्राग्वाट दोसी कल्हा भा. भावलदे पुत्र दो.मणि-पाल-साजणादिभिः स्वजन श्रेयोर्थं श्रीआदिनाथबिंबं श्रीजयानंदसूरि श्रीदेवसुंदरसूरीणा मुमदेशेन कारितं श्रीगुरुभिः प्रतिष्ठितं ॥

९९ (६२२)

सं. १४३७ वर्षे ......गुरू श्री-श्रीमालज्ञातीय बाइ धिनो .... श्रीशांतिनाथबिंबं प्र. नागेन्द्रगच्छे श्रीहरिभद्रसूरिभिः ॥

१०० (४०८)

सं. १४३९ वर्षे मा. वदि ८ रवौ ऊकेशज्ञातीय बहुदेव (?) सुत सं. गुणवर भा. आवड सु. जस सु. सूसानहण (?) सहिसुडनत (?) सा. नरपति तिहुणा भा. तिहुणदे पु. सु. सो. षोषा भा. बिखमादे सुत सो. लूढा भा. लाषणदे पु. सो. पुना-मुलराजाभ्यां पितृ-मातृ-सकलपूर्वपुरुष तव भा (?)सो. वाला सो. बहुप्रति श्रेयोर्थं श्रीशांतिचतुर्विंशति-पट्टः का. प्र. श्रीरामचंद्रसूरिभिः ॥

१०१ (१०७२)

सं. १४३९ वर्षे पोस वदि ९ रवौ अद्येह श्रीअणहिलपत्तने वा. सिद्धांतिक श्रीनाण-चंद्रसूरिगुरुणां श्रेयसे पं. सर्वाणं द-पं महेंद्रपरिवृता पोषधशालायां भक्तजनपूजार्थं आचार्य श्रीअ .... चंद्रसूरिभिः म्र्मूतिः कारिता प्रतिष्ठिता च

१०२ (८६६)

सं. १४३९ वर्षे माघ वदि ९ .... श्रे. लीला प्रा. नामल्ल परबतसिहेन पि...... श्रे. श्रीशांतिनाथपंचतीर्थी का. प्र. श्रीसावदेवसूरिभिः ॥

१०३ (६५४)

सं. १४४० वर्षे पोस सु. १ बुधे श्रीमालज्ञातीय .... मातृ पुनादेश्रे. हीरासुत आहलाकेन पित्रोः श्रेयसे श्रीवासुपूज्यबिंबं का. प्रति. पिप्पलाचार्यश्री-जयतिलकसूरिभिः ॥

१०४ (५६२)

सं. १४४० वर्षे पोस सु. १२ बुधे श्री श्रीमा. श्रे. गोघा सा. मटाह्वि गुरदे (?) सु. जीवाकेन पितृ-मातृश्रेयोर्थं श्रीमुनिसुव्रतस्वामिबिंबं कारितं प्र. श्रीरत्नशेखरगुरुणामुपदेशेन श्रीसूरिभिः ॥

१०५ (३०६)

संवत् १४४० वर्षे पो. सु. १२ बुधे श्रीश्रीमालज्ञा. कीतल भा. कूंतादे ....श्रीवासुपूज्यपंच. का. प्रति. पिप्प. श्रीउदयानंदसूरि प्र.

१०६ (६८२)

सं. १४४० वै. सु. २ शनौ श्रीमालीय मां. वीकम भार्या पूजी पितृव्य मां. चांगा तेषां श्रे. पुत्र तम (?) सेगाकेन श्रीआदिनाथबिंबं का. प्र. श्रीहरिषेणसूरीणामुपदेशेन प्रति.

१०७ (६४५)

सं. १४४४ गुर्जरज्ञातीय वाउयागोत्रे सा. प्रथमसीह पुत्र सा. नवरंग बा. छाजी पुत्र सा. कर्मसीह भ्रातृ सा. कीर्तिपालाभ्यां आत्मश्रेयसे श्रीआदिनाथबिंबं का. प्रति खरतरगच्छीयभट्टारकश्रीजिनहितसूरिभिः ।।श्री।।

१०८ (५५५)

सं. १४४५ वर्षे फा. व. ११ रवौ श्रीअंचलगच्छे श्रीश्रीमालज्ञातीय श्रे. दामर भार्या नामलदेश्रेयोर्थं श्रे. वीकाकेन श्रीपार्श्वनाथबिंबं का. श्रीअभयसिंहसूरीणामुपदेशेन प्रति. श्रीसूरिभिः ।।

१०९ (७३४)

सं. १४४६ वर्षे ज्येष्ठ .... दि ३ सोमे श्रीअंचलगच्छेश श्रीमेरुतुंगसूरीणामुपदेशेन उकेशवंशे व्य. माखर भा. मावलदे पुत्र शालिगेन श्रीआदिनाथबिंबं का. प्रतिष्ठापितं ।।

११० (६८४)

सं. १४४६ ....वदि १२ शनौ श्रीमालज्ञातीय श्रे. मूलराज भ्रातृ पासतोर भा. शेखसुता अरमइ (?) तेन श्रीवासुपूज्यबिंबं का. प्र. श्रीरत्नशेखरसूरीणामुपदेशेन प्रति.

१११ (२११)

संवत् १४४७ वर्षे फागुण सुदि ८ सोमे प्राग्वाटज्ञातीय सं. मेघा भार्या मीणलदेवि सुत सं. उदयसीहेन पितृ-मातृश्रेयोर्थं श्रीकुंथुनाथपंचतीर्थीबिंबं कारितं प्रतिष्ठितं श्रीनागेंद्रगच्छे श्रीरत्नप्रभसूरिभिः ।।

११२ (१५१७)

सं. १४४७ वर्षे फागुण सु. ६ सोमे श्रीअंचलगच्छे श्रीमेरुतुंगसूरीणामुपदेशेन शाला प. वि. (?) धणपाल भार्या गहिरिण सुत वि. मोषाकेन श्रीवासुपूज्यबिंबं का. प्रति. श्रीसूरिभिः

११३ (८२)

संवत् १४४७ वर्षे वै. सु. ३ शनौ श्रीश्रीमालज्ञातीय पितामहसाजण-भा. महजलदे-श्रेयसे प्रौत्र गूटा-सिण्ता (?) भ्यां श्रीआदिनाथबिंबं कारितं प्रति. ब्रह्माणगच्छे श्रीमुनि-चंद्रसूरिभिः ।।

११४ (१३६८)

सं. १४४७ वर्षे ....छाज भा. साधुपूर्णिमापक्षे श्रीधर्मचंद्रसूरि पं. श्रीधर्म्मतिलकसूरीणामुपदेशेन का. प्र. ॥

११५ (४५४)

संवत् १४४६ वर्षे वैशाख वदि .... उसवालज्ञातीय श्रेयोर्थं मुनिसुव्रतबिंबं का. प्र. श्रीहीरविजयसूरिभिः ॥

११६ (१०१८)

सं. १४५० वर्षे माह वदि ६ सोमे श्रीभावडगच्छे श्रीमालज्ञातीय पितृ पेथा मातृ प्रमलदे भ्रातृ गोहिस पाहिस भूंजाल तथा भ्रातृव्य माकड एतेषां श्रेयसे व्य. वषतसीहेन श्रीशांतिनाथस्य चतुर्विंशति पट्ट का. प्र. श्रीभावदेवसूरिभिः ॥ शुभंभवतु ॥

११७ (१५४६)

सं. १४५० वर्षे वै. व. ११ शनौ श्रीमालज्ञातीय विणायगत्रडूउ कलत्र करमीणदे भ्रातृ मीमउ कलत्र संसारदे. पुत्र सहिदे कलत्र सिरीयादे पुत्र गोलाकेन श्रीशांतिनाथबिंबं कारापितं प्रति. श्रीचेत्रगच्छे श्रीपुण्यदेवसूरिभिः

११८ (२३६)

संवत् १४५० वर्षे ज्येष्ठ सुदि १३ गुरौ श्रीमालज्ञा. श्रे. श्रीविक्रम भार्या विक्रमदे पुत्र साइया भार्या सरसइ समस्त पूर्वजननिव (?) श्रीआदिनाथबिंबं कारितं प्रतिष्ठितं श्रीसूरिभिः ॥

११६ (६१६)

सं. १४५१ वर्षे ज्येष्ठ वदि ६ शुक्रे प्रागवाट व्य. वरदे भार्या संसारदे व्य. गोवा भार्या लाडी तथा पितृव्य वीसल तेषां श्रेयसे श्रीअजितनाथबिंबं का. प्र. श्रीजयतिलक-सूरीणामुपदेशेन ॥

१२० (२१७)

संवत् १४५२ वर्षे वैशाख शुदि ६ शुक्रे श्रीप्रागवाटज्ञाती पितृकर्मण-मातृकामलदे-अन्ययः कोऽपि पीडां करोति अस्य श्रेयोर्थं सुत चंडूयाकेन श्रीसुमतिनाथ.का.प्र. नागेंद्रगच्छे श्रीउदयदेवसूरिभि.

१२१ (१५६)

संवत् १४५२ वर्षे वैशाख वदि १ सोमे श्रीश्रीमालज्ञातीय पितृश्रे. वाना-मातृबा.-वीहलणदेविश्रेयसे सुतसामलेन श्रीश्रीआदिनाथबिंबं कारितं प्रतिष्ठितं श्रीब्रह्माणगच्छे श्रीबुध्धिसागरसूरिपट्टे श्रीविमलसूरिभिः

१२२ (७३२)

सं. १४५२ वर्षे ज्येष्ठ सु. ५ रवौ श्रीमालज्ञातीय व्य. .... नागलदे सुत व्य. माता-पिताश्रेयोर्थं श्रीमहावीरबिंबं का. प्र. महेन्द्रसूरिभिः ॥ ॥ शुभंभवतु ॥

१२३ (५६६)

सं. १४५३ वर्षे वै. सु. ३ शनौ शालगत (?) ज्ञातीय ठ. लखमा भा. श्रेणी सुत ठ. कर्माकेन श्रीअंचलगच्छेशश्रीमेरतुंगसूरीणामुपदेशेन श्रेयोर्थं श्रीमहावीरबिंबं का. प्र. श्रीसूरिभिः ॥

१२४ (५२३)

सं. १४५३ वर्षे वै. सु. ३ शनौ श्रीप्राग्वाटज्ञा. महं कर्मसी भा. फवकु पुत्र संग्राम भा. जीवणी आत्मश्रेयसे श्रीआदिनाथबिंबं का. श्रीपूर्णिमापक्षे प्रतिष्ठितं श्रीसूरिभिः ॥

१२५ (१६०)

संवत् १४५३वर्षे वैशाख सुदि ३ शनौ प्राग्वाटज्ञातीय ठ. भीमा ठ. झाटा ठ. सिहाकैः स्वकुलविवृद्धये अंबिकागोत्रदेवी .... प्रतिष्ठिता वडगच्छे श्रीअभयदेवसूरिभिः ॥छ॥

१२६ (३०४)

संवत् १४५४ वर्षे माघ सुदि नवमी तिथौ शनिदिने प्राग्वाटज्ञातीय श्रे. ...डसिल (?) भा. कीह्लणदे सुत वीरपाल-६ णपाल-ढोला-श्रेयास-मोसाकेन श्रीआदिनाथबिंबं का. श्रीगुणाकरसूरीणामुपदेशेन ॥

१२७ (५६४)

सं. १४५४ वर्षे आषाढ सु. ६ रवौ प्राग्वाटज्ञा. श्रेष्ठि मांजू भार्या मालूणदे सुत नरसी श्रीवासपूज्यबिंबं का. प्र. श्रीदेवसुंदरसूरिभिः ॥

१२८ (४७७)

संवत् १४५६ वर्षे माघ सु. १३ शनौ श्रीश्रीमालज्ञातीय श्रे. .... भार्या सीतादे भर्तृनिमित्तं श्रीअजितनाथबिंबं कारापितं प्र. त्रिभवीया श्रीपद्मप्रभसूरिभिः ॥

१२९ (२३५)

संवत् १४५६ वर्षे ज्येष्ठ सुदि ८ सोमे प्राग्वाटज्ञातीय ठ. सांटाणरा (?) श्रीसींगारदे पुत्र ठ. कडूग्राकेन पितृ-भ्रातृ. श्रीमहावीरबिंबं का. प्र. श्रीकोरंटगच्छे श्रीनन्नसूरिभिः ॥

१३० (१०५२)

सं. १४५६ ज्येष्ठ व. २ भूमे ....सूहवदे सुत खीमाकेन मातृ-पित्रोः कारिता प्रतिमा श्रेयसे श्रीशांतिनाथस्य प्र. पूर्णिमापक्षे श्रीभावदेवसूरिभिः

१३१ (१५८)

संवत् १४५८ वर्षे वैशाख सुदि ९ दिने सा. लाखा पुत्र सहसा-सालिगाभ्यां श्रीअजितनाथदेवबिंबं कारितं प्रतिष्ठितं श्रीखरतरगच्छे श्रीजिनराजसूरिभिः ।

१३२ (६७९)

सं. १४५८ वर्षे वैशाख वदि ९ श्री श्रीमालज्ञातीय श्रे. बचउ श्रे. नफरू श्रे. गुणपाल श्रेयोर्थं श्रे...श्रीशांतिनाथबिंबं का. प्र. श्रीब्रह्माणगच्छे श्रीमुणिचंद्रसूरिभिः ॥

१३३ (७८)

संवत् १४५८ वर्षे वैशाख वदि ....सोमे श्रीश्रीमालज्ञातीय ठ. ऊमा भार्या बउलादे तयोः पुत्रेण ठ. वाघाकेन मातृ-पितृश्रेयोर्थं श्रीसुमतिनाथबिंबं कारापितं प्रतिष्ठितं श्रीसूरिभिः ॥

१३४ (४६४)

संवत् १४५९ वर्षे चैत्र सुदि-शनौ श्रीश्रीमालज्ञातीय श्रे. खोढा भा. सिहजलदे तयोः पौत्राः श्रे. पाह्लण-सहित्रतिहुणा श्रे. बटूया साल्यैंडू अप्र (?) स्वपितृश्रेयसे .... आगमिकगच्छे श्रीमुनिसिंहसूरीणामुपदेशेन आदिनाथबिंबं कारितं प्रति. श्रीसूरिभिः ॥

१३५ (१५५२)

सं. १४५९ वर्षे चैत्र सुदि.........शनौ श्रीमालज्ञातीय पितृकर्म्मा-मातृकस्मरिदेश्रेयसे सुत रणमलकेन श्रीशांतिनाथबिंबं का. प्र. श्रीनागेन्द्रगच्छे श्रीउदयदेवसूरिभिः ॥

१३६ (६५३)

सं. १४५९............................श्रीमालज्ञातीय ....श्रे. भीमाकेन पुत्र ....आत्मने भा. कस्मीरादेश्रेयसे श्रीशांतिनाथबिंबं का. प्रति. श्रीउदयदेवसूरिभिः ॥

१३७ (६८७)

सं. १४६२ वर्षे वै. सु. ५ शुक्रे भावडारगच्छे श्रीमालज्ञातीय श्रे. देवसी भार्या लख-मादेश्रेयसे पुत्र थिरपालेन श्रीसंभवनाथबिंबं कारितं प्रति. श्रीविजयसिंहसूरिभिः ।। शुभं ।।

१३८ (२०१)

संवत् १४६४ वर्षे आषाड सुदि ६ शुक्रे श्रीप्राग्वाटज्ञातीय न. (?) गोवल भार्या धाधलदे सुत लाडा भ. श्रीजयतिलकउपदेशेन श्रीशांतिनाथबिंबं प्रतिष्ठितं श्रीसू०भिः ।।

१३९ (१७४)

संवत् १४६५ वर्षे माघ सुदि ३ शनौ श्रीमालज्ञातीय श्रे. आका भार्या गांमीश्रेयसे श्रीशांतिनाथपंचतीर्थी लिंबाकेन कारिता आग............ ....सूरिउपदेशेन प्रतिष्ठिता विधिना ।।

१४० (७६६)

सं. १४६५ वर्षे माघ सु. ३ शनौ प्राग्वाट श्रे. डूंगर भार्या नाउं पुत्र शिखरेण आत्म-श्रेयसे श्रीआदिनाथबिंबं का. प्र. श्रीशीलचंद्रसूरीणामुपदेशेन

१४१ (६६६)

सं. १४६५ वर्षे माघ ३ दिने श्रीशांतिनाथबिंबं ....

विजयदेवसूर (?)............ ... प्रति.

१४२ (१३७१)

सं. १४६५ वर्षे काती व. ५ गुरु ....

सुत मांडण भार्या कर्मणि सुतआणंदश्रेयसे श्रीपार्श्वनाथबिंबं का. प्र. श्रीदेवसुंदरसूरिभिः ।।

१४३ अ (१२७)

संवत् १४६५ वर्षे काती व ५ गुरू सा. उदेशी भा. उत्तमदे सुत धर्मसी भा. लाछू-श्रेयसे श्रीशीतलनाथबिंबं कारितं प्र. श्रीपल्लीगच्छे शांतिसूरिपट्टे श्रीसूरिभिः ।।

१४३ ब (११११)

सं. १४६५ वर्षे वै. सु. १२ भंडारी गोत्रे सा. डामू भार्या मेघा पु. धनराज-खिमरा-जाभ्यां कारापितं श्रीआदिनाथ. प्रति. श्रीधर्मघोषगच्छे श्रीपद्मचंद्रसूरिभिः

१४४ (९५१)

सं. १४६५ वर्षे वै. व. १ बुधे श्रीमालीज्ञातीय पितृविदा-मातृसूमलदेश्रेयसे सुतरामा-केन श्रीशांतिबिंबं का. प्र. श्रीनागरगच्छे श्रीगुणसागरसूरिभिः

१४५ (१७२)

संवत् १४६६ वर्षे भाद्र. सुदि ३ रवौ प्राग्वाटज्ञातीय परीक्ष मोटा भा. बाइ कपूरदे तयोः सुता वाछा-आकासिधायरैः (?) बृहत्तपापक्षे श्रीरत्नाकरगच्छे श्रीरत्नसागरसूरीणा-मुपदेशेन श्रीआदिनाथबिंबं प्रतिष्ठापितं शुभं भवतु ऋध्धिवृध्धिर्भवतु ॥

१४६ (३७३)

संवत् १४६६ वर्षे वै. सु. ३ सोमे श्रीश्रीमालज्ञातीय श्रे. सोमसिह् भा. सइभलदे सुत गोवल पसांम (?) सु. गेहाकेन स्वपित्रोः श्रेयसे श्रीआदिनाथबिंबं का. प्र. सि. श्रीमलय-चंद्रसूरिभिः ॥

१४७ (६४४)

सं. १४६६ वै. सु. ३ सोमे उपकेशज्ञातौ श्रे. कडूआ भा. भावलदे सु. मोघाकेन पुत्र उदयसीसहितेन भा. बाईराजूश्रेयसे श्रीवासुपूज्यबिंबं का. प्र. श्रीकोरंटगच्छे श्रीनन्नसूरिभिः

१४८ (१५१४)

सं. १४६६ वर्षे वैशाख सु. ३ सोमे उपकेशज्ञातीय श्रे. कडूआ भार्या भावलदे सु. षोषा भा. श्याणी पित्रोः श्रे. श्रीसंभवनाथबिंबं का. प्र. कोरंटगच्छे श्रीनन्नसूरिभिः

१४९ (७२२)

सं. १४६६ वर्षे वै. सु. ५ बुधे काष्ठासंघे श्रीनरेंद्रकीर्तिगुरुपदेशेन हूंबडज्ञातीय पंखी-स्वरगोत्रे श्रे. मेघा भार्या साउ सुत वरसिंह पितृव्य कान्हश्रेयोर्थं

१५० (५४३)

सं. १४६६ वर्षे वै. व. ६ गुरौ उसिवालज्ञातीय मंडोरागोत्रे सा. बोहि भा. मेघू पुत्र-भादाभा. भावनादेविभ्यां श्रीशीतलनाथबिंबं का. प्र. श्रीधर्मघोषगच्छे श्रीमलयचंद्र-सूरिभिः ॥

१५१ (७५२)

सं. १४६६ वर्षे .... ८ दिने प्राग्वाटज्ञातीय म. मेघा भार्या मीणलदे सुत हरसीहेन श्रीअभिनंदनबिंबं स्वमातृश्रेयोर्थं कारितं प्रति. तपागच्छनायकश्रीदेवसुंदर-सूरिगुरुभिः ॥

१५२ (७०७)

सं. १४६८ वर्षे काती वदि २ सोमे श्रीअंचलगच्छे नाम्याक (?) रूपाकेन श्रे. मंड-लिक भा. आल्हू माता-पित्रोः श्रेयोर्थं श्रीशांतिनाथबिंबं श्रीमेरुतुंगसूरिणां उपदेशेन कारितं प्रतिष्ठितं

१५३ (१०२८)

सं. १४६८ वर्षे वै. व. ३ शुक्रे श्रीमाली ज्ञा. कउडीशाखीय सुरा भा. सुहवदे पु. व्य. धना भा. सूल्ही पु...रामा श्रासाकेण (?) मातृ-पितृश्रेयोर्थं श्री-पार्श्वनाथबिंबं श्रीअंचलगच्छे श्रीमेरुतुंगसूरीणामुपदेशेन का. प्र. श्रीसंघेन

१५४ (२०४)

संवत् १४६८ वर्षे वैशाख वदि ३ शुक्रे श्रीश्रीमालज्ञातीय पितृ-सरवण-मातृअरवदेवी श्रेयोर्थं सुत नरदेवेन श्रीअजितनाथबिंबं कारितं प्रतिष्ठितं पिपलगच्छे श्रीधर्म्मप्रभसूरिभिः ।।

१५५ (१३५८)

सं. १४६९ वर्षे माघ सु. ६ रवौ ऊकेशवंशीय नाहटा हाथिया सुत सा. मेहाश्रावकेण पुत्र गूजर-करमणाभ्यां परिवृतेन श्रीसंभवनाथबिंबं का. प्रति. श्रीखरतरगच्छे श्रीजिन-वर्धनसूरिभिः ।।

१५६ (२१)

संवत् १४६९ वर्षे वैशाख वदी १ सोमे प्राग्वाटज्ञातीय म. धूःल सुत म. भावा सुत महं सलखा भा. बा. सूहवदे तयोः सुत महं हरपाल भार्या हासलदे ताभ्यां स्वश्रेयोर्थं श्री-शांतिनाथबिंबं कारितं प्रतिष्ठितं श्रीतपागच्छनायकपूज्यश्रीदेवसुंदरसूरिशिष्यश्रीश्रीश्रीगुण-रत्नसूरिभिः ।।

१५७ (६१६)

सं. १४६९ श्रीऊकेशवंशे व्य. देदा [भा.] देल्हणदे सुत गोवल भार्या हांसलदे-गउरवे सुत मेहाकेन निज पितृश्रेयोर्थं श्रीसुमतिनाथबिंबं कारितं प्रति. श्रीदेवसुंदरसूरिशिष्यश्री-गुणरत्नसूरिभिः ।। श्री ।।

१५८ (१४२२)

सं. १४६९ वर्षे श्रीमालज्ञा. मं. चायण भार्या बाई पुनादे सुत रतनाकेनात्मश्रेयोर्थं आगमिकश्रीचारित्रतिलकसूरीणामुपदेशेन श्रीशांतिनाथादि कारिता प्रतिष्ठिता च विधिना

१५९ (७५)

संवत्१४७० वर्षे वै. व. ७ गुरौ श्रीमालीज्ञातीय धरसिंग सुत ठ. लींबाकेन पितृव्य-मलारसिंह (?) श्रेयोर्थं श्रीअंचलगच्छे श्रीमेरुतुंगसूरीणामुपदेशेन श्रीशांतिनाथबिंबं कारितं प्रतिष्ठापितं च ।।

१६० (४६४)

सं. १४७० प्राग्वाट ज्ञातीय व्य. कडूआ भार्या मांजु सुत ठ. मांगण-सील्हाभ्यां मातृ-पितृश्रेयोर्थं श्रीकुंथुनाथबिंबं का. प्र. तपागच्छे श्रीसोमसुंदरसूरिभिः ॥

१६१ (८२७)

सं. १४७१ वर्षे माघ सु. १० शनौ प्राग्वाट सपूनसीह .... पुत्र ठ. खीमा पुत्र ठ. उदयसीह पुत्र ठ. धारसीह भार्या सा. धाधलदे पुत्र सा. भार्या प्रीमलदे पुत्र सा. मांजाकेन श्रीअंचलगच्छे श्रीमहिंतिलकसूरीणामुपदेशेन स्वश्रेयसे श्रीसुमतिनाथबिंबं का. प्रतिष्ठापितं ॥

१६२ (२१६)

संवत् १४७१ वर्षे माघ सुदि १० रवौ श्रीश्रीमालज्ञातीय वामट भार्या मचकूनाम्न्या भर्तृश्रेयसे तथा सुतटालश्रेयसे श्रीचंद्रप्रभस्वामि-चतुर्विंशतिपट्टः कारितः प्रति. पिप्पलगच्छे श्रीसोमचंद्रसूरिभिः ॥

१६३ (२२६)

संवत् १४७१ वर्षे माह सु. ६ शनौ श्रीश्रीमालज्ञा. श्रे. सूरा भार्या सूहवदे सुत राजाकेन पितृव्य काला पित्रो निमित्तं श्रीशांतिनाथपंचतीर्थी कारिता प्रति. नागेन्द्रगच्छे श्रीसिंहरत्नसूरिभिः शुभं भवतु

१६४ (६३३)

स्वस्ति श्रीजयाभ्युदयश्च सं. १४७२ वर्षे मार्ग. वदि ५ गुरौ प्राग्वाटज्ञातीय सा. पोमा भार्या श्री तयोः सुतौ ठ. मांडण ठ. तिला श्रीशांतिनाथबिंबं जिवतस्वामिरूपं निजश्रेयसे कारापितं प्रति. श्रीसूरिभिःचिरं नंदतु रिद्धि-वृद्धिदायक भवतु शुभं भवतु श्री॥

१६५ (१३६६)

सं. १४७२ वर्षे हुंबडज्ञातीये रजीयाणागोत्रे ठ. वेरुआ भा. रामिति सु. नेरेवा (?) भा. फणु श्रीमूलसंघनंदिसंघे बलात्कारगणे सरस्वतीगच्छे भट्टा. श्रीपद्मनंद्युपदेशात् श्रीचंद्रप्रभबिंबं प्रतिष्ठापितं प्रणमति ॥ ॥

१६६ (३१६)

संवत् १४७२ वर्षे श्रीश्रीमाल श्रे. पाल्हणसीह भा. पाल्हणदेव्या. सुताम्नाडी (?)-केनात्मश्रेयसे श्रीसुमतिनाथादिपंचतीर्थी कारिता श्री .... मुपदेशेन प्रति. श्रीसूरिभिः ॥

१६७ (२६०)

संवत् १४७३ वर्षे चैत्र सुदि ... साधुशाखायां सा. साहुलपुत्रेण सा. जीहाकेन पुत्र समधरविकान्वितेन श्रीशांतिनाथबिंबं कारितं प्रतिष्ठितं श्रीखरतरगच्छे श्रीजिनवर्द्धन-सूरिभिः ॥

१६८ (७०३)

सं. १४७३ वर्षे वै. सु. ५ बुधे श्रीमालज्ञातीयव्य. समरसा भार्या प्र. सहजलदे द्वि. भा. शाणीश्रेयोर्थं सुत चुहथाकेन श्रीधर्मनाथचतुर्विंशति पट्टः का. श्रीपूर्णिमापक्षीयश्रीमुनि-तिलकसूरीणामुपदेशेन प्र. श्रीसूरिभिः ॥

१६९ (११४०)

सं. १४७३ वर्षे ज्येष्ठ सु. ११ बुधे दिने प्राग. ज्ञा. श्रे. धरणा भा. सलखणदेव्या पितृ-मातृश्रेयोर्थं सु. गोल्लेन श्रीनमिनाथबिंबं का. प्रति. श्रीसूरिभिः ॥

१७० (६८९)

सं. १४७४ वर्षे माघ सुदि १३ गुरौ ....

१७१ (७४७)

सं. १४७४ फा. वदि १ सोमे प्राग्वाटज्ञातीयव्य. वीकम भार्या वीकमदे व्य. खेता भार्या खेतलदे सुत आकाकेन भार्या आणलदेश्रेयसे स्वपूर्वज श्रेयसे श्रीवासुपूज्यबिंबं कारि. प्रति. श्री ५ श्रीविमलचंद्रसूरिणामुपदेशेन प्रति.

१७२ (७४६)

सं. १४७६ वर्षे चै. व. १ शनौ उपकेश पादडागो. जयरा भा. गांगी पु. चुहताकेन पित्रोः. श्री श्रीपद्मप्रभ. का. श्री पद्म .... सूरिभिः ॥

१७३ (८५)

सं. १४७५ वर्षे ज्येष्ठ वदि ५ सोमे प्राग्वाट सं. मांडण भा. माल्हणदे पु. पासा-कोलाभ्यां पौत्राः (?) श्रे. श्रीपार्श्वनाथबिंबं कां. प्र. श्रीपासचंद्रसूरिणामुपदेशेन ॥ छ ॥

१७४ (५७६)

सं. १४७५ वर्षे श्रे. लूणापुत्रयो .... भार्या ....

वाघा-घरणि-कुटंबसमुदायेन पित्रोः भ्रातृरतनानिमित्तं श्रीआदिनाथबिंबं का. प्र. श्रीहरिप्रभसूरिभिः ॥

१७५ (१३५६)

सं. १४७६ वर्षे चौ. व. १शनौ श्रीमालज्ञातीयव्य. लखमण भा. रनादे सु. नरपाल भा. वांछू श्रेयसे सु. जठोसाकेन (?) श्रीशीतलनाथबिंबं का. प्र. पिप्पलगच्छे श्रीमुणिचांद्रसूरि पट्टे श्रीसोमचांद्रसूरिभिः ॥

१७६ (१०६)

संवत् १४७६ वर्षे वैशाख सुदि २ सोमे श्रीश्रीमालज्ञातीय संघवी साडा भार्या कामलदे सुत सं. मना-अमरण-कर्मण-डाहा-जोधाकैः पुत्र समधरसालिग-साइआ-राषा-हांसादियुतैः स्वश्रेयोर्थं श्रीमुनिसुव्रतबिंबं कारितं प्रतिष्ठितं श्रीसूरिभिः ॥

१७७ (१३३३)

सं. १४७६ वर्षे वै. सु. २ श्रीमालज्ञातीयव्य. मालदे भा. कामलदे सुत व्य. हीराकेन स्वश्रेयोर्थं श्रीऋषभदेवबिंबं का. प्र. श्रीतपागच्छाधिराज भट्टा. श्रीसोमसुंदरसूरिभिः ॥

१७८ (६५०)

सं. १४७६ प्राग्वाटज्ञातीय श्रे. पाल्हा भा. माणिक पुत्र भीमेन भा. चांपूयुतेन स्वश्रेयोर्थं श्रीशांतिनाथबिंबं का. प्र. तपागच्छाधीशेन भ. श्रीसोमचांदरसूरिभिः ॥ श्री ॥

१७९ (१३३५)

सं. १४७७ वर्षे फा. व. ४ शुक्रे ....

श्री विमलनाथबिंबं का. प्र. श्रीसकलसंघेन

१८० (१५०)

संवत् १४७७ वर्षे वैशाख सु. ३ शनौ श्रीश्रीमालज्ञातीय पितृ श्रे. गोगा मातृ गंगादेवि श्रेयसे सुत जेसाकेन श्रीधर्मनाथमुख्यपंचतीर्थी कारिता पूर्णि. श्रीरत्नसागर सूरिपट्टे श्रीगुणसागरसूरिणामुपदेशेन ॥

१८१ (६४५)

संवत् १४७७ वर्षे वैशाख सुदि ५ श्रीश्रीमालज्ञातीय श्रेष्ठि पांचा भा. प्रेमलदे सुत श्रेष्ठि सूढा भा. सहिगदे आत्मश्रेयसे सुत पूना श्रीपद्मप्रभादिचतुर्विंशतिबिंबं कारितं श्री-चैत्रगच्छेभटारक श्रीगुणदेवसूरीणामुपदेशेन प्रतिष्ठितं ॥

१८२ (४८३)

सं. १४७७ वर्षे वै. सु. ५ श्रीमालज्ञातीय श्रे. पांचा भा. प्रेमलदे सुत श्रे. सूढा भा. मेलादे आत्मश्रेयसे सुत पुना श्रीमुनिसुव्रतस्वामिचतुर्विंशतिबिंबं का. श्रीचैत्रगच्छे भट्टा. श्रीगुणदेवसूरीणामुपदेशेन प्रतिष्ठितं ॥

१८३ (८०)

संवत् १४७७ वर्षे वैसा (शा) ख सुदी ५ श्रीश्रीमालश्रेष्ठि पांपच भा. प्रीमलदे सुत श्रेष्ठि सूंढा भा. मेलादे आत्मश्रेयसे सुत पूना श्रीनेमिनाथादिचतुर्विंशतिबिंबं कारितं चैत्रगच्छे श्रीगुणदेवसूरिणामुपदेशेन प्रतिष्ठितं ॥

१८४ (६)

सं. १४७८ वर्षे फागुण वदि ८ रवौ उपकेशज्ञातीय नरसीसंताने सा. धना भा. राजू पु. हापा-वेलाभ्यां भार्यासहिताभ्यां पित्रोः श्रेयसे श्रीआदिनाथबिंबं का. प्रति. वृ. गच्छे देवाचार्य सं. श्रीपूर्णचंद्रसूरिभिः ॥

१८५ (३५०)

संवत् १४७८ वर्षे चैत्र सुदि ८ गुरौ श्रीमाली श्रे. पर्वतेन श्रीअंचलगच्छेशश्रीमेरुतुंगसूरीणामुपदेशेन .... श्रीमुनिसुव्रतस्वामि ... .

१८६ (९७३)

सं. १४७८ वर्षे वै. सु. ६ प्रागवाट ज्ञातीयव्य. अता सु. श्रे. मांडण सुत डूंगर भाधर धरमसी णामासी (?) पाचा धना तेण श्रे. धर्मसिंहेन स्वकुटुंबपरिवृतेन स्वश्रे. श्रीआदिनाथबिंबं का. प्र. तपागच्छनायकश्रीसोमसुंदरसूरिभिः ॥

१८७ (१७३९)

सं. १४७८ वर्षे वैशाख सुदि ६ दिने प्रागवाटज्ञातीय मं. बाछा भार्या अहिवदे पुत्र मंत्रि करणा कडूआ आका लामान .. .. करण भार्या-पौत्र-पुत्र सं. महिराजेन स्वपित्रोः श्रेयसे श्रीसुमतिनाथबिंबं का. प्र. श्रीसोमसुंदरसूरिभिः

१८८ (२५)

संवत् १४७८ वर्षे वैशाख सु. ६ दिने ऊंविरावासी प्रागवाटज्ञातीयव्य. वाघा सुत व्य. ....

....

उपदेशेन सोमसुंदरसूरिभिः प्रतिष्ठितं ॥

१८९ (७२३)

सं. १४७८ वर्षे वै. सु. ६ दिने प्रागवाटज्ञातीयव्य. आना भार्या सरसई पुत्र श्रे. लीना भार्या लखमादे सुता९ श्रे. पर्वत-वेला-हीरा-चांपा-समरा-गोना-राम-राघव-देवडाभिधान .... श्रे. वेला-चांपा-गोनाराघवदेवडबंधुभिः स्वस्वभार्या पुत्रादियुतैः स्वपितृश्रेयोर्थं श्रीशांतिनाथमूलबिंबं चतुर्विंशतिपट्टः कारितः प्रति. तपागच्छनायकभट्टारक श्रीसोमसुंदरसूरिभिः ॥

१९० (१२५१)

सं. १४७८ वर्षे वै. सु. १३ सोमे ओसवालज्ञातीय श्रे पांपच भा. सरव सु. श्रे सादा भा. मनू सु. वईरसी बीसल श्रे. सादा जीवतस्वामिश्रीसुपार्श्वबिंबं का. प्र. पूर्णिमा प. श्री शीलचंद्रसूरिभिः

१९१ (२८४)

संवत् १४७८ वर्षे वैशाख सुदि १३ सोमे श्रीश्रीमालज्ञाती व्य. लखमण भार्या. लख-मीदेश्रेयसे सुत तेजाकेन श्रीवासुपूज्यबिंबं कारितं प्रतिष्ठितं पूर्णिमापक्षे श्रीजयसिंहसूरिपट्टे श्रीजयप्रभसूरिणामुपदेशेन

१९२ (३४४)

संवत् १४७८ वर्षे वैशाख सुदि १२ श्रीश्रीमालज्ञातीय सं. सोमा भार्या सींगारदे सुत ० तेजा नाल्हा हेमाकेन स्वश्रेयोर्थं श्रीशांतिनाथबिंबं कारितं प्रति. श्रीसूरिभिः ॥

१९३ (८१४)

सं. १४७९ वर्षे माघ सु. ४ शुक्रे ओसवालज्ञातौ भण. सा. झाझण सुत सा. सामलेन पुत्र सउंद्रा (?) साजण-समरा-सहसा-समधर-सांगा-पौत्र सा. पासिवा (?) मांजा-सोना-नायकादि-परिवारसहितेनात्मपुण्यार्थं श्रीचंद्रप्रभस्वामिबिंबं का. प्र. खरतरगच्छे श्रीजिन-राजसूरि पट्टे श्रीजिनभद्रसूरिभिः ॥

१९४ (१५१९)

संवत् १४७९ वर्षे माघ सु. १० रवौ श्रीमालज्ञातीय मं. पासवीर भार्या रुडी तयोः सुतेन मं. देपाकेन भार्या देऊसहितेन आत्मश्रेयोर्थं जीवितस्वामिश्रीसुवि[illegible]नाथपंचतीर्थी कारिता प्रतिष्ठिता ब्रह्माणगच्छे भट्टारकश्रीवीरसूरिभिः श्रीशुभंभ ....

१९५ (३५३)

संवत् १४७९ वर्षे माघ शु .... महिपा. भा. मा[illegible]लदे तयोः सुत श्रे. चहुथाकेन स्वश्रेयसे श्रीचंद्रप्रभजिनबिंबं कारितं प्रतिष्ठितं श्रीबुध्धिसागरसूरिभिः॥

१९६ (५२०)

संवत् १४७९ वर्षे चै. व. २ गुरौ श्रीश्रीमालज्ञातीय महं वीर भा. बाइ लल्मादे सुत -ट भार्या रांणीदे-भलीश्रेयोर्थं मत्रीजदेवा-धनाकेन श्रीसंभवनाथचतुर्विंशतिबिंबं कारापितं थारापद्रगच्छे प्रति. श्रीशांतिसूरिभिः ॥

१६७ (१३५६)

सं. १४८० वर्षे वै. सु. १० शनौ प्राग्वाटज्ञातीयव्यव. डूंगर भा. रत्नादे पु. भीमा भा. नीतादेसहितेन आत्मश्रेयसे श्रीश्रेयांसनाथबिंबं का. प्र. ब्रह्माणीयगच्छे श्रीउदयप्रभसूरिभिः ।।

१६८ (१२५४)

सं. १४८१ वर्षे फा. सु. ३ प्राग्वाटज्ञातीय व्य. आसा भा. माउ सुत नीसल भा. चांपलदेव्या स्वसुतमंडनश्रेयसे श्रीचंद्रप्रभबिंबं का. प्र. तपापक्षे श्रीसोमसुंदरसूरिभिः

१६६ (११२०)

सं. १४८१ वर्षे फा. सु. ३ शनौ प्राग्वाटवंशे व्यव. वयरसीह सुत व्यव. सरवण भा. बाइ भली तत्पुत्र मंत्रिमांडणेन भार्या भाऊ सुत देवराज पुत्री देऊ धरमोसहितेन पित्रोः श्रेयसे श्रीशांतिनाथबिंबं कारितं श्रीतपागच्छे प्रति. श्रीदेवसुंदरसूरिपट्टे श्रीसोमसुंदरसूरिभिः ॥

२०० (१८७)

संवत् १४८१ वर्षे पोस वदि ८ शुक्रे श्रीश्रीमालज्ञातीय सं. चादा भार्या चापलदे सुत केल्हा भार्या रुपादे आत्मश्रेयसे श्रीजीवितस्वामी श्रीअनंतनाथबिंबं कारापितं श्रीचैत्रवालगच्छे प्रतिष्ठितं श्रीजिनदेवसूरिभिः शुभं भवतु ॥

२०१ (५०२)

संवत् १४८१ वर्षे ज्येष्ठ सुदि १३ प्रा. ज्ञातीय श्रे. भूभच भा. उमादे तयोः सुत श्रे. गोधनेन स्वपितृश्रेयोर्थं श्रीपार्श्वबिंबं का. प्र. श्रीसोमसुंदरसूरिभिः ॥ श्रीः ॥

२०२ (४००)

संवत् १४८२ वर्षे माघ सुदि ८ भोमे उ. सा. बला भार्या सोनी पुत्र लाहडेन भा. वाहणिसहितेन आत्मश्रेयसे श्रीपद्मप्रभबिंबं का. प्र. मडाडीयनाणचंद्रसूरिभिः ॥

२०३ (२०२)

संवत् १४८३ वर्षे माघ सुदि १० बुधे प्राग्वाटज्ञातीय व्य. हरपाल भार्या हमीरदे सु. सना भार्या देऊ स्वश्रेयसे श्रीसुमतिनाथबिंबं कारितं श्रीतपागच्छे प्र. श्रीसोमसुंदरसूरिभिः ॥

२०४ (१४३७)

सं. १४८३ वर्षे फा. सु. मोढज्ञातीय श्रे. वीरपाल भा. सुहगल सुता श्रा. रतनूनाम्न्या स्वश्रेयसे स्वपतिश्रेयसे हीराश्रेयसे च श्रीकुंथुनाथबिंबं का. प्र. श्रीसूरिभिः श्रीज्ञानकलससूरिभिः

२०५ (१४२९)

सं. १४८३ वर्षे फागुण व. ११ ऊ. ज्ञातीय गागान्वये सा. करमा पुत्र वउध(?) भा. वीरू पुत्र लखमाकेन पूर्वज निमित्तं श्रीशांतिनाथबिंबं का.प्र. श्रीसंडेरगच्छे श्रीशांतिसूरिभिः

२०६ (१०७३)

सं. १४८३ वर्षे वै. व. ६ शुक्रे भावमृत (?) मूलु भा. साऊ सु. धींधाकेन भा. कूंती सहितेन पित्रोः श्रेयसे श्रीमुनिसुव्रतबिंबं का. प्र. पूर्णिमा. श्रीविमलचंद्रसूरीणामुपदेशेन श्रान्दि (?) ॥

२०७ (७११)

सं. १४८३ वर्षे प्राग्वाटव्य. देवा भार्या साउ पुत्र सहसानुजव्य. नरबदेन भार्यामंदोअरिप्रमुखकुटुंबयुतेन स्वश्रेयसे श्रीविमलनाथबिंबं का. प्रति. श्रीकक्कसूरिभिः ।।श्री।।

२०८ (१०७)

संवत् १४८४ वर्षे मार्ग सु. १० दिने प्राग्वाटज्ञातीय व्य. धोलू भार्या वारु सुत व्य. मांडण-धर्मसिहाभ्यां स्वमातृपितृश्रेयसे श्रीसुमतिबिंबं कारितं प्र. श्रीसोमसुंदरसूरिभिः ॥

२०९ (३६०)

सं. १४८४ वर्षे वैशाख सु. ३ शनौ ऊ. सा. छाहड भा. सुहवदे सुत पनाकेन पितृमातृश्रेयसे श्रीकुंथुनाथबिंबं का. ऊकेशगच्छे श्रीसिद्धाचार्यसंताने प्र. श्रीदेवगुप्तसूरिभिः ॥

२१० (५३४)

सं. १४८४ वर्षे वै. सु. ३ शनौ वीरवंशे सं. नरपाल भा. देउ ज्येष्ठपुत्र सं. जयसीह भा. काउ सुत जिनदत्तेन पितृनाम्न्या (?) स्वश्रेयसे श्रीसुमतिनाथबिंबं श्रीअंचलगच्छेश-श्रीजयकीर्तिसूरीणामुपदेशेन कारिता प्र. च. श्रीसंघेन श्री

२११ (५२७)

सं. १४८४ वै. सु. ८ शुक्रे श्रीमालज्ञातीय श्रे. लूणसी भा. लाखणदे सुत खीमानिमित्तं भा. पासडेन श्रीनेमिनाथबिंबं कारापितं प्र. श्री. नागेंद्र. श्रीगुणसागरसूरिभिः ॥

२१२ (३७६)

संवत् १४८४ वर्षे वै. सु. ११ रवि श्रीश्रीमालज्ञातीय श्रे. पांपच भा. प्रीमलदेवि सुत सुषवाकेन भा. सोहगदेवि सुत सं. पूनावि कुटुंबयुतेन स्वश्रेयसे कारितः अनागतचुवीसी-श्रीपद्मनाभप्रमुखचतुर्विंशतिपट्टः श्रीचंत्रगच्छे श्रीजिनदेवसूरिभिः श्रीमुंजिगपुरग्रामनी . . . .

२१३ (१५६४)

सं. १४८४ वर्षे वै. सु. ११ रवौ मुंजीगपुरग्रामेयनय (?) श्रीमालज्ञा. श्रे. पापच भा. प्रीमलदेवि सुत सं. सूटाकेन भा. साहगदेवि भा. मेलू सु. पूनादि कुटुंबयुतेन स्वश्रेयोर्थं का अनागतचऊवीशीश्रीसर्वानुभूतिप्रमुखचतुर्विंशितिपट्टकः प्रति. श्रीचंत्रगच्छे श्रीजिनदेव-सूरिभिः

२१४ (५३१)

सं. १४८४ वर्षे वै. सु. ....ण भार्या धांधलदे सुत डाहाकेन मातृ-पित्रोः श्रेयसे देवश्रीशांतिनाथबिंबं का. प्र. उदवेत्य (?) श्रीवीरचंद्रसूरिभिः ।।

२१५ (७६०)

सं. १४८४ वर्षे वै. व. ११ रवौ श्रीमालज्ञा. श्रे. वीरा भार्या संभलदे सुत समधर-प्रभृतिसकुटंबकेन पितावईरसामित (?) पंचतीर्थी श्रीअजितनाथबिंबं का. प्रति. श्री चं. श्रीजिनदेवसूरिभिः

२१६ (१५४१)

सं. १४८४ ज्येष्ठ वदि ११ दिने व्य. पेथाकेन श्रीसुपार्श्वचतुर्विंशतिपट्टकः का. प्र. श्रीसूरिभिः ।।

२१७ (१५४०)

सं. १४८४ वर्षे ज्येष्ठ वदि ११ दिने प्रा. ज्ञा. पासवीर तद्भार्या पदमलदे तत्सुतव्य. पांचा भा. उमी तया सुतव्य. पेथाकेन भा. पाल्हणदे भगिनी झबकू सुत काज (?) वधु-कामलदेव्यादिकुटुंबयुतेन निजश्रेयोर्थं श्रीसुपार्श्वजिनचतुर्विंशतिपट्टकः कारितः प्रतिष्ठितः तपागच्छाधिराज श्रीसोमसुंदरसूरिभिः ।।

२१८ (३६)

स्वस्तिश्री संवत् १४८५ वर्षे माघ सुदि ५ सोमे उपगच्छे बा. व्यव. सायर भार्या धारु सु. आल्हा भार्या डाही सु. राघव मातृ-पितृ-श्रेयसे श्रीपार्श्वनाथबिंबं कारि. प्रतिष्ठितं श्रीबृहद्गच्छे श्रीसोमसुंदरसूरिणा वा. शुभचंद्रेण प्रतिष्ठितं ।।

२१९ (१०७४)

सं. १४८५ वर्षे वै. सु. ६ रवौ श्रीमालज्ञातीयव्य. वीरधवल भा. विणलदेविश्रेयसे मातृ-पितृश्रेयोर्थं सुत वाघाकेन श्री पार्श्वनाथबिंबं का. पूर्णिमापक्षीयश्रीमुनितिलकसूरीणामुपदेशेन प्रति. विधिना

२२० (५१)

संवत् १४८५ वर्षे वैसाख सुदि ८ सोमे प्राग्वाटज्ञा. श्रे. मोषा भार्या मोषलदे सुत मूलाकेन भार्यामिषादेसहितेन सुतमहिराज-भार्याचांइश्रेयोर्थं श्रीसुमतिनाथबिंबं कारितं प्रतिष्ठितं पूर्णिमापक्षे भट्टारकश्रीगुणदेवसूरीणामुपदेशे ....

२२१ (१२५०)

सं. १४८५ वर्षे वै. व. ५ रवौ श्रीऊकेशवंशे मं. संग्राम सुत मंत्रि लींबा भार्या लीलादे तयोः पुत्रेण मं. सहसाकेन श्रीआदिनाथबिंबं कारायितं प्र. श्रीशांतिसूरिभिः ॥
श्री संडेरगच्छे ॥

२२२ (२८०)

संवत् १४८५ वर्षे वैशाख वदि ६ रवौ श्रीश्रीमालज्ञातीय सोनी मेघा भा. चांपलदे प्रतिपन्नसुत पाहलाकेन सो. पाहला भा. पहासू (?) सहितेन पितृश्रेयसे श्रीशीतलनाथबिंबं कारापितं थारापद्रीय प्रतिष्ठितं श्रीसूरिभिः ॥

२२३ (१३६०)

सं. १४८५ वर्षे प्राग्वाटज्ञा. व्य. कीतल भा. करमी पु. लांपा भा. लहिकूनाम्न्या पुत्र समधरयुतया श्रीशांतिनाथबिंबं स्वश्रेयोर्थं का. प्र. तपागच्छेशश्रीसोमसुंदरसूरिभिः ॥

२२४ (२२९)

संवत् १४८५ वर्षे प्राग्वाटज्ञातीय श्रे. सामल भार्या साहगदे सुत आजाकेन पित्रोः श्रेयसे श्रीपद्मप्रभुबिंबं कारितं प्रति. श्रीसोमसुंदरसूरिभिः ॥

२२५ (२१५)

संवत् १४८६ वर्षे माघ सुदि ५ गुरौ श्रीउपकेशज्ञातीयः पूंगी श्रे. अमरसी भार्या झबकू तयोः पुत्रः सा. नरबद भार्या जासूआ स्वश्रेयसे श्रीनमिनाथबिंबं कारितं उपकेशगच्छे प्रतिष्ठितं श्रीसिद्धसूरिभिः

२२६ (६५४)

संवत् १४८६ वर्षे माह सुदि ५ गुरौ श्रीश्रीमालज्ञातीयः श्रेष्ठिपूनडसंताने श्रे. पासड पुत्र सांगा भार्या सूहवदे पु. केसवेन भा. पांचीयुतेन पित्रोः श्रे. श्रीमुनिसुव्रतबिंबं का. प्र. श्रीउपकेशगच्छे ककुदाचार्यसंताने श्रीसिंहसूरिभिः ॥

२२७ (७३५)

सं. १४८६ वर्षे फा. व. ११ प्रा. व्य. ग्रजसी भार्या गांगी सुत साल्हाकेन भा. धीरू सुत देवा भा. पूरी सुता रत्नाप्रभृतिकुटुंबयुतेन स्वश्रेयसे श्रीशांतिनाथबिंबं का. तपागच्छे श्रीसोमसुंदरसूरिभिः प्रति. श्री

२२८ (१४३०)

सं. १४८६ वर्षे वै. सु. ६ उप. ज्ञा. आदित्यनागगोत्रे सा. फालण भा. छाडी पुत्र धरमा भा. तोल्हाही पु. सहदेव-कालूनिमित्तं सुहडा-सोमा-सीधरसहितेन श्रीअजितनाथबिंबं का. श्रीजयकेसरि कुक्क (?) श्रीसिंहसूरिभिः ॥

२२९ (५६०)

सं. १४८६ वर्षे वै. सु. १ बुधे श्रीमालज्ञातीय श्रे. वाछा भा. लूली पुत्र वाघाकेन मातृ-पितृश्रेयसे श्रीविमलनाथबिंबं का. प्र. उकेशगच्छे सिद्धाचार्यसंताने श्रीदेवगुप्तसूरिभिः

२३० (३१९)

सं. १४८६ वर्षे वै. सु. १३ प्राग्वाटज्ञातीय सा. माला भार्या खेतलदे सुत सा. जयतसिंहेन भा. रानी समन्वितेन स्वश्रेयसे श्रीमुनिसुव्रतस्वामिबिंबं कारितं प्रतिष्ठितं तपागच्छे श्रीसोमसुंदरसूरि शिष्यैः पं. हर्षमूर्त्तिगणिभिः ॥

२३१ (५२८)

सं. १४८६ वर्षे ज्येष्ठ वदि ५ शुक्रे उसवालज्ञातीय सा. समरा पुत्र सा. धरणा भा. कुंतादेवि पुत्र मोखणसीह-लखमसीहाभ्यां आत्मश्रेयोर्थं श्रीपार्श्वनाथबिंबं कारापितं प्रति. श्रीखरतरगच्छे श्रीजीनवर्धनसूरिपट्टे श्रीजीनचंद्रसूरिभिः ॥

२३२ (६१)

संवत् १४८७ वर्षे कार्तिक सुदी ५ सोमे समी वा. श्रीश्रीमालज्ञातीय व्य. छांगा भा. धांधलदे सुत शवा-काल्हाभ्यां पितृ-मातृश्रे. श्रीआदिनाथपंचतीर्थी का. श्रीपूर्णिमापक्षे श्रीमुनितिलकसूरीणामुपदे. प्रति. सूरिभिः ॥

२३३ (७०)

संवत् १४८७ वर्षे माघ सुदि ५ गुरौ श्रीश्रीमालज्ञातीय मं. नायक भा. नायकदे पुत्र मं. वेला भा. मारुनाम्ना सुतपामवीर (?) सहितया निजश्रेयसे श्रीसुमतिनाथबिंबं कारितं श्रीआगमगच्छे श्रीहेमरत्नसूरीणामुपदेशेन ।।श्री।।

२३४ (१३१०)

सं. १४८७ वर्षे माह सु. ५ गुरु श्रीमालज्ञातीय पितृखीमा-मातृ-खेतलदेश्रेयोर्थं संत धरणाकेन श्रीसुमतिनाथबिंबं का. प्र. श्रीपूर्णिमापक्षे श्रीसाधुरत्नसूरीणामुपदेशेन विधिना

२३५ (१४२५)

सं. १४८७ .... वा केन भा. मापू पु. हांसादियुतेन श्रीअजितबिंबं का. प्र. तपा. श्रीसोमसुंदरसूरिभिः श्री

२३६ (५५२)

सं. १४८८ वर्षे फा. सु. प्राग्वाट सं. प्रथमा भा. पाल्हणदे पुत्र सं. डूंगर भा. मेचू सु. सं. गुणराजेन भा. लखमादेव्यादियुतेन श्रीपार्श्वनाथबिंबं का. प्र. तपा. श्रीसोमसुंदरसूरिभिः ।।

२३७ (८५३)

सं. १४८८ वर्षे वै. सु. ५ सोमे सानगोत्रे सा. जेसाभार्या विनू ज्ञारस्वत ज्ञातीया स .... श्रीअंबिकादेवि प्रति.

२३८ (५३)

संवत् १४८८ वर्षे वैसाख सुदि १० गुरौ प्राग्वाटज्ञातीय मं. जेसा भार्या बाई रुपी तयोः सुत मं. देसलेन निजश्रेयोर्थं श्रीशांतिनाथबिंबं कारितं प्रतिष्ठितं श्रीतपापक्षे भट्टारकश्रीरत्नसिंहसूरिभिः शुभंभवतु श्री श्री श्री ।

२३९ (१०८०)

सं. १४८८ ज्येष्ठ सु. १० ऊकेश श्रे. कडूआ भार्या कश्मीरदे सुतया श्रा. जासूनाम्न्या श्रेयोर्थं श्रीमुनिसुव्रतबिंबं का. प्र. तपाश्रीसोमसुंदरसूरिभिः

२४० (३५६)

संवत् १४८८ वर्षे ज्येष्ठ सु. १४ शनौ प्राग्वाटवंशे श्रे. वीरा भार्या वीभलदे पु. भचुंड भा. सारूनिमित्तं श्रे. पापचा(?)त्म श्रेयसे श्रीसंभवनाथबिंबं कारापितं उके. श्रीसिद्धाचार्यसंताने प्रतिष्ठितं भंडारोदेवसू. प्रति.

२४१ (१४७१)

सं. १४८९ वर्षे माघ सु. १० शुक्रे घुल्हागोत्रेमंत्रि लखमसीह पु. मं. पदमा भा. पदमलदे सुत सा. नोडाश्रावकेण भा. नामलदेकुक्षिजातकपु. हांसामल्ह-पौत्रसीधर-श्रीवच्छ श्रीवंतादिपरिवारसहितेन श्रीपद्मप्रभबिंबं का. प्र. श्रीखरतरगच्छे श्रीजिनराजसूरिपट्टे श्रीजिनभद्रसूरिभिः ॥

२४२ (१६०)

सं. १४८९ वर्षे माह सु. १० दिने ऊकेशवंशे सा. जोल्हा पुत्र सा. जयसिंघ पुत्र सा. गुणियाकेन निजपितुः पुण्यार्थं श्रीवासुपूज्यबिंबं का. प्र. च श्रीखरतरगच्छे श्रीजिनभद्रसूरिभिः ॥

२४३ (१५०९)

सं. १४८९ वर्षे वैशाख सुदि ३ बुधे श्री...... ... .
तृव्य हीरा सुत व्य. विजयकरण व्य. गजादिकुटुंबयुतेन स्वपितुः श्रेयसे श्रीसुमतिनाथबिंबं कारितं प्रतिष्ठितं श्रीतपागच्छाधिराज भट्टा. प्रभुश्रीसोमसुंदरसूरिभिः ॥

२४४ (७१७)

सं. १४८९ वर्षे वै. सु. ३ बुधे श्रीश्रीमालज्ञातीय व्य. ....भार्या अहिवदे तथा सुत हेमा पितृ-मातृ-भ्रातृश्रेयार्थं सुत डूंगर गांगा ....
श्रीअजितनाथबिंबं का. प्र. पिप्पलगच्छे श्री मुणिचंद्रसूरिपट्टे श्रीसोमचंद्रसूरिभिः ॥

२४५ (१५३९)

सं. १४८९ वर्षे वै. सु. ३ बुधे श्रीमालज्ञातीय व्य. मालदेव भा. कामलदे सुत व्य. मेघाकेन भ्रातृव्य हीरा सुत व्यव. विजयकरण व्य. गजादिकुटुंबयुतेन स्वश्रेयसे श्रीसुमतिनाथपंचतीर्थी कारिता प्रतिष्ठिता श्रीतपागच्छाधिराज भट्टारकश्रीसोमसुंदरसूरिभिः ॥ श्री ॥

२४६ (४५६)

संवत् १४८९ वर्षे वै. सु. ३ बुधे श्रीश्रीमालज्ञातीय.......................................
साडो (?) भा. पूंजी पुत्र भाचा भा. रूडीपुत्रेण भीमाकेन भा. वारुसहितेन स्वश्रेयसे श्रीपार्श्वनाथबिंबं कारितं प्रतिष्ठितं श्रीपूर्णिमापक्षे श्रीहरिषेणसूरिपट्टे श्रीधनप्रभसूरीणामुपदेशेन विधिवत् श्राद्धैः ॥

२४७ (१५३७)

संवत् १४८६ वर्षे वैशाख सु. ३ उकेशज्ञातीय सा. सूरा सु. समधरसी भा. हषू सुत भीमसीहेन भा. मिमसिरीयुतेन स्वश्रेयसे श्रीसुविधिनाथबिंबं का. प्र. श्रीसूरिभिः ।।

२४८ (३७१)

संवत् १४८६ वर्षे वैशाख वदि ११ शुक्रे श्रीश्रीमालज्ञातीय श्रे. देवा भा. हरखू द्वि भ्रातृ श्रे. कामदे भा. लाडी तयोः सुत देपालेन स्वपितृव्यश्रेयोर्थं श्रीअनंतनाथबिंबं श्रीमुनिसिंहसूरीणामुपदेशेन कारापितं ।।

२४९ (७१२)

सं. १४८९ वर्षे वै. व. ११ शुक्रे उपकेशज्ञातौ सुचिती गोत्रे सा. सांगा पुत्र मूलराज भार्या माणि .... सिंघाकेन भ्रातृकमणश्रेयसे श्रीचंद्रप्रभबिंबं का. प्र. श्रीउपकेशगच्छे ककुदाचार्यसंताने श्रीसिद्धसूरिभिः ।।

२५० (७६५)

सं. १४९० वर्षे फा. सु. २ गुरौ प्राग्वाटज्ञातीय श्रे. ....
हरदे भार्या पांचू सुत गुणीयन्नूनाम्यां (?) पितृहरदेनिमित्तं श्रीशांतिनाथबिंबं का. उकेश गु. सिद्धाचार्यसं. प्रति. श्रीदेवगुप्तसूरिभिः

२५१ (१२७७)

सं. १४९० वर्षे फा. सु. १५ शुक्रे समीवास्तव्यश्रीमालज्ञातीयव्य. साजण भार्या बाई शरी श्रेयोर्थं सुत व्य. कान्हा भ्रातृ नीना पितृमातृकेन श्रीनेमिनाथमुख्यचतुर्विंशतिपट्टः कारापितः श्रीपूर्णिमापक्षे श्रीमुनितिलकसूरीणामुपदेशेन प्रति.

२५२ (४७१)

संवत् १४९० चै. व. ६ शनौ टींकिरिवास्तव्य श्रीश्रीमालज्ञातीय श्रे. सायर भा. सिरिआदे सुत डायाकेन स्वपितृ-मातृश्रेयसे श्रीधर्मनाथादिचतुर्विंशतिपट्टः कारितः आगमगच्छेशश्रीअमरसिंहसूरितत्पट्टधरश्रीहेमरत्नसूरीणामुपदेशेन प्रतिष्ठितं ।।

२५३ (६५५)

सं. १४९० वर्षे वै. सु. ३ सोमे श्रीअंचलगच्छेशश्रीजयकीर्तिसूरीणामुपदेशेन श्रीश्रीमाली परी. सांजण भार्या वल्हादेपुत्रेण परी. जीवराजश्रावकेण स्वपितृश्रेयसे श्रीधर्मनाथबिंबं का. प्रतिष्ठितं ।।

२५४ (२६)

संवत् १४९१ वर्षे माघ सुदि ५ बुधे उसवंसे सो. तेजा सु. सो. हेमा भार्या धनाई पुत्र सो. भौतू स्वपुण्यार्थं श्रीशीतलनार्थबिंबं कारितं प्रतिष्ठितं श्रीखरतरगच्छे श्रीजिन-सागरसूरिभिः ।।

२५५ (३४०)

संवत् १४९१ वर्षे माह सुदि ५ दिने बुधवारे ऊकेशवंशे बलाहीगोत्रे सा. धणसी पुत्र हीरा भार्या हीरादे तत् पुत्र सा. हासाकेन पुण्यार्थं श्रीअजितनार्थबिंबं कारितं प्रति. श्रीखर-तरगच्छे श्रीजिनसागरसूरिभिः ।।

२५६ (६२)

संवत् १४९१ वर्षे माघ वदी १० सोमे श्रीश्रीमालज्ञातीय श्रे. कर्मण भा. कपूरदे पितृव्य देवा-पांचाश्रेयसे सुत लुणाकेन श्रीआदिनार्थबिंबं कारापितं प्र. पिप्पलगच्छे भ. श्री-सोमचंद्रसूरिपट्टे श्रीश्रीउदयदेवसूरिभिः ।।श्री।।

२५७ (११११६)

सं. १४९१ वर्षे ज्येष्ठ व. ८ रवौ प्रागवाटव्य. लूणा भार्या लूणादे सुत करणा भार्या करमीकेन श्रेयोर्थं श्रीमुनिसुव्रतस्वामिबिंबं कारापितं प्रति. श्रीसोमसुंदरसूरीणामुपदेशेन

....

२५८ (१४४८)

सं. १४९१ वर्षे ज्येष्ठ व. ८ रवौ श्रीमालज्ञा. सं. वीरा भा. वुलदे सुत सं. शिवराज भा. मटकू एतयोः स्वश्रेयसे जीवतस्वामिश्रीआदिनार्थबिंबं का. प्र. चैत्रगच्छे श्रीजिनदेव-सूरिभिः ।।

२५९ (१५८२)

सं. १४९१ वर्षे आषा. वदि ७ प्राग्वाटवंशे सिधपुरवास्तव्य नरदे भा. गांगी सुत व्य. महिराजेन, भ्रातृकरणा सुत बडूआ-बीबा भ्रातृज हीरा, हांसाभार्या हरखू कर्णाभार्या मरगादे भ्रातृजाया छांछी वांछु प्रमुखकुटुंबसहितेन श्रीसुमतिबिंबं का. प्रति. श्रीसूरिभिः शुभं भमतु ।।

२६० (१४१९)

सं. १४९१ आ. व. ७ श्रीमालवंशे वडलीवास्तव्य सं. साडा भा. कामलदे सु. सं. डायाकेन भा. माकू सु. साईआ-भूधरप्रमुखकुटुंबसहितेन श्रीधर्मनार्थबिंबं का. प्र. श्री तपा. सोमसुंदरसूरिभिः ।।

२६१ (१५७३)

सं. १४९२ वर्षे कार्ति. व. १० रवौ श्रीमालज्ञातीयगोत्रि लाडण्वा. सा. पहुसज (?) सुत तेजा खरतरगच्छे श्रीकीर्तिराजोपाध्या .... श्रीनेमिनाथ ....

२६२ (१६५)

संवत् १४९२ वर्षे वैशाख सुदि २ बुधे प्राग्वाट मं. वेला भा. वोझलदे सुत मं. सामलेन भार्याकपूरीयुतेन निजपितृव्य. धरणसोश्रेयोर्थं श्रीग्रादिनाथबिंबं कारितं प्र. श्रीतपागच्छनायकश्रीसोमसुंदरसूरिपुरंदरैः ॥

२६३ (४३५)

संवत् १४९२ वर्षे वैशाख सु. ३ बुधे ....

... स्वश्रेयसे श्रीवासुपूज्यबिंबं कारितं प्र. श्रीधर्मघोषगच्छे श्रीपद्मचंद्रसूरिपट्टे श्रीमनो वि (?)

२६४ (१६५४)

सं. १४९२ वर्षे वै. सु. ३ बुधे प्राग्वाटज्ञातीय झांझण भार्या वानू सु. सोमा-पद्मा-श्रेयसे श्रीमुनिसुव्रतस्वामिबिंबं का. प्रति. वृध्धतपागच्छे श्रीरत्नसिंहसूरिभिः शुभं भूयात् ॥

२६५ (२९१)

संवत् १४९२ वर्षे वैशाख वदि ११ शुक्रे श्रीश्रीमालज्ञातीय श्रे. पांचा भार्या पोमी सुत ग्रालहाकेन पितृश्रेयोर्थं मातृश्रेयसे च श्रीसुविधिनाथपंचतीर्थी का. बिंबं कारापितं श्रीनागेंद्रगच्छे प्रतिष्ठितं श्रीगुणसमुद्रसूरिभिः वहूग्रे (?) ॥

२६६ (१४२०)

सं. १४९२ वर्षे प्राग्वाटज्ञातीय श्रे. लखा भा. लूणादे सु. डामरलूणा-नरपालादिभिः स्वकुटुंबश्रेयोर्थं श्रीधर्मनाथबिंबं का. प्र. श्रीतपागच्छनायकभट्टा. प्रभु श्रीसोमसुंदरसूरिभिः ॥

२६७ (३३२)

संवत् १४९२ वर्षे .... का. प्रति. श्रीविबुधप्रभसूरिभिः ॥

२६८ (८६३)

सं. १४६३ वर्षे फा. सु. ८ बुधे श्रीमालज्ञातीय .... भार्या झाझू मातृश्रेयोर्थं श्रीश्रेयांसबिंबं कारापितं श्रीपूर्णिमागच्छे भ. श्रीललितप्रभसूरिभिः भ. जयप्रभ.

२६९ (१३५७)

सं. १४६३ वर्षे वै. सु. ५ बुधे श्रीमा. व्यव. फोफा भा. सहिजलदे सु. सालिग खीमसी सालिग भा. वडू सु. सूटाकेन पितृ-पितृव्यश्रेयसे श्रीकुंथनाथबिंबं का. श्रीपूर्णिमापक्षीय-श्रीवीरप्रभसूरीणामुपदेशेन प्रति. श्रीसूरिभिः ।।

२७० (१६०)

संवत् १४६३ वर्षे वैशाख सुदि ५ बुधे बुधवी[illegible]व्य श्रीश्रीमालज्ञातीय व्य. डाहा भार्या पूनादे पुत्र कालाकेन मातृ-पितृ-श्रेयसे ....

२७१ (१४२७)

सं. १४६४ वर्षे ज्येष्ठ सु. १० भोमे प्रागवाटज्ञा. व्यव. महिपा भा. देउ पु. वडु भा. गवी पुत्र कर्मण-धर्मणाभ्यां भा. बूटी-तकोसहिताभ्यां पित्रोः श्रेयसे श्रीनमिनाथचतुर्विंशतिपट्टः कारितः प्र. कछोभीलावाल (?) गच्छे पूर्णिमापक्षे भ. श्रीरत्नप्रभसूरिपट्टे भ. श्रीसर्वाणंदसूरीणामुपदेशेन प्रति.

२७२ (१०८६)

सं. १४६३ वर्षे ऊकेशवंशे दरडागोत्रे सा. हरपाल सु. आसा पुत्रौ पाल्हा-झाटाकौतयोर्मध्यात् सा. झाटाकेन सकुटुंबेन आत्मश्रेयोर्थं श्रीआदिनाथबिंबं का. प्र. श्रीसूरिभिः ।। श्री ।।

२७३ (३६८)

संवत् १४६४ वर्षे पोस वदि ६ सोमे प्रागवाटज्ञातीय श्रे. नापा भा. वानू सु. श्रे. समा-हेमा-कडूया-भ्रातृजहीरादिभिः भ्रातृ श्रे. सायरश्रेयसे श्रीअजितनाथबिंबं का. प्र. श्रीसुविहितसूरिभिः ।।

२७४ (६६)

संवत् १४६४ वर्षे माघ सु. ५ बुधे श्रीअंचलगच्छेशश्रीजयकीर्तिसूरीणामुपदेशेन प्रागवाटज्ञातीय मं. वीरा भार्या टबकत पुत्र्या अरधूश्राविकया स्वश्रेयसे श्रीसुमतिनाथबिंबं कारितं प्रतिष्ठितं चसुश्रावकैः ।।

२७५ (८१०)

सं. १४६४ वर्षे माघ व. ११ गुरौ श्रीमालज्ञातीय श्रे. कुंपा भार्या रांउ पुत्र श्रे. महिपाल-जोगाऽकरणादिभिः श्रीअंचलगच्छेशश्रीजयकीर्तिसूरिउपदेशेन निजमातृश्रेयसे श्रीसुमतिनाथबिंबं का. प्र. श्रीसंघेन ॥

२७६ (४६)

संवत् १४७६ वर्षे वैसाष सुदि २ शनौ उसवालज्ञातीय घृतां पितृसाजण-मातृसिरी-आदेश्रातृ नाल्हा-समधर-सूराश्रेयसे सुत मूलाकेन श्रीसंभवनाथमुख्यपंचतीर्थी भीमपल्लीय-पूर्णिमापक्षे भ. श्रीजयचंद्रसूरीणां उपदेशेन प्रतिष्ठिता ।।श्री।।

२७७ (१३४५)

सं. १४४६ वर्षे वै. सु. २ शनौ श्रीमालज्ञातीय ... ...
पितृलखमण-मातृरूपादे श्रेयसे सुतजावड-गोधाभ्यां श्रीधर्मनाथबिंबं का. भीमपल्लीयपूर्णिमापक्षे भट्टा. श्रीजयचंद्रसूरीणामुपदेशेन प्रति.

२७८ (१३२६)

सं. १४६४ वर्षे ऊकेशज्ञातीय मं. गोवल भा. लाछु सु. मं. दूदाकेन भा. वजू सुत मं. शिवराज, महिराज भा. फाई पुत्र गुणराजादि आत्मकुटुंबयुतेन रात्नं श्रीआदिनाथबिंबं तत्परिकरश्च कारितः स्वश्रेयोर्थं प्रति. च तपागच्छनायक भ. प्रभुश्रीदेवसुंदरसूरिपट्टे श्रीसोमसुंदरसूरिभिः श्रीशुभं भवतु ।।

२७९ (१३८०)

सं. १४६५ वर्षे फा. व. ६ बुधे श्रीमालज्ञा. ठ. जयता भा. जयतलदे पु. डूंगर भा. वूल्हादे सु. नाथा मातृ-पितृश्रेयसे ठ. धना श्रीशीतलनाथबिंबं का. प्र. मलधारिगच्छे श्रीविद्यासागरसूरि पट्टे श्रीगुणसुंदरसूरिभिः ॥

२८० (२७६)

संवत् १४६५ वर्षे ज्येष्ठ सुदि १४ बुधे ऊकेशवंशे सो. तेजा तत्पुत्र सो. हेमा तत्पुत्र सो. राजू तद्भार्या अमरी तत्पुत्र सो. धीरा-सो. जीवाभ्यां श्रीअजितनाथबिंबं स्वपूण्यार्थं कारितं प्रतिष्ठितं श्रीखरतरगच्छे श्रीजिनवर्धनसूरि-पट्टे श्रीजिनसागरसूरिभिः ।।

२८१ (७४१)

सं. १४६५ वर्षे ज्येष्ठ वदि १ शुक्रे उपकेशज्ञातीय असिठवागोत्रे (?) दंसाज (?) भार्या सूमलदे सुत लींबाकेन पित्रोः श्रेयसे श्रीश्रेयांसनाथबिंबं का. श्री भावडारगच्छे श्रीकालिकाचार्यसंताने श्रीविजयसिंहसूरिपट्टे प्र. श्रीवीरसूरिभिः ।।

२८२ (३३३)

संवत् १४९५ वर्षे ऊकेशवंशीय सा. सूरा भार्या सुहवदे सुत साह सहदेव भार्या सहजलदे सुत सा. सोनाकेन भार्या सेधारणादि (?) कुटुंबयुतेन मातृ-पितृश्रेयसे श्रीकुंथुनाथ-चतुर्विंशतिपट्टः कारितः प्रतिष्ठितः श्रीबृहत्पक्षे भट्टारक ... ...

२८३ (१२२४)

सं. १४९६ वर्षे फा. सु. २ प्रा. गां. जगपाल भा. झली सु. गां. खीमाकेन भा. टबकू सु. गां. महिराजादियुतेन स्वश्रेयोर्थं श्रीमुनिसुव्रतस्वामिबिंबं का. प्रति. श्रीसूरिभिः ।।

२८४ (२१६)

संवत् १४९६ वर्षे फागुण वदि ६ बुधे ठ. परबत सुत ठ. नाथा भा. जीविणि तत्पुत्रेण ठ. अमराकेन स्वभार्या सनखतश्रेयसे श्रीवासुपूज्यबिंबं का. प्रति. श्रीकोरंटगच्छे नन्नाचार्यसंताने श्रीकक्कसूरिपट्टे श्रीसावदेवसूरिभिः ।।

२८५ (१५९१)

सं. १४९६ वर्षे वै. सु. २ प्रा. श्रे. अजेसी भा. लाषू सु. सहदे भा. लीबु सु. शिवा-वाघा-कीकाश्रे. वीरानमित्तं श्रीसुपार्श्वबिंबं कारापितं प्र. श्रीसोमसुंदरसूरिभिः ।।

२८६ (१५२६)

सं. १४९६ वर्षे वैशाख सित ९ दिने उकेशवंशे साधुशाखायां सा. साजण पुत्र सा. सिवा सा. सदा सुश्रावकैः पुत्रसिवदत्त-सोमदत्तसहितैः श्रीशांतिनाथबिंबं का. प्र. श्रीखरतर-श्रीजिनभद्रसूरिभिः ।।

२८७ (१६१७)

स्वस्तिश्री संवत् १४९६ वर्षे वैशाख सुदी १३ शुक्रे सौराष्ट्रीक श्रीप्राग्वाटज्ञातीय व्य. दिपा ली. बी (?) बाइ झमकु पुत्र व्य. आबाकेन भा. अणपमदेवीसहितेन पितृ-मातृश्रेयसे श्रीआदिनाथ चतुर्विंशतिपट्टः कारितः प्रतिष्ठित श्रीचैत्रगच्छे सौराष्ट्रकीकभट्टारक-श्रीरत्नाकरसूरीभिः

२८८ (८३)

संवत् १४९६ वर्षे वै. सु. १३ ऊकेशज्ञातीय श्रे. पूनसी भार्या रुपीणि सुत मं. जयताकेन भा. जइतलदे पुत्र धना-दना-ठाकुरसी वाच्छादियुतेन स्वश्रेयसे श्रीधर्मनाथबिंबं कारितं प्रतिष्ठितं श्रीतपाश्रीसोमसुंदरसूरिभिः ।।

२८९ (२२८)

संवत् १४९६ वर्षे वै. व. प्रा. व्य. खेता भार्या खेतलदे सुत व्य. जोगाकेन भा. लींबा-युतेन स्वश्रेयसे श्रीश्रीमुनिसुव्रतबिंबं कारितं प्रतिष्ठितं श्रीतपागच्छनायकश्रीसोमसुंदर-सूरिभिः ।।श्री।।श्री।।

२९० (१५०३)

सं. १४९६ वर्षे ज्येष्ठ सु. १० बुधे प्राग्वाटज्ञा. दोसी सूदा भा. गोइ सु. जेसिंग भा. माकू सुत हेमाकेन पितृ-मातृश्रेयसे श्रीश्रीअनंतनाथबिंबं का. प्र. श्रीसूरिभिः

२९१ (१४८)

संवत् १४९६ वर्षे ज्येष्ठ सु. १० श्रीश्रीमालज्ञातीय संघवी जइता भा. जइतलदे दोसी देवराज भा. देहलदे सुत तहूण (?)भार्या माकू स्वश्रेयसे श्रीसंभवनाथचतुर्विंशतिपट्टः का. प्रतिष्ठितः तपागच्छनायक-श्रीसोमसुंदरसूरिभिः श्रीःश्रीः ।।

२९२ (७)

संवत् १४९६ वर्षे ज्ये. सु. १० सं. वाछा भार्या लली पु. आपदेव भार्या दुल्हादे सुत उदयसीभार्यया रूपिणिनाम्न्या सुत हंसराजादि कुटुंबयुतया स्वश्रेयोर्थं श्रीवासुपूज्यबिंबं का. प्र. श्रीश्रीसोमसुंदरसूरिभिः ।।श्री।।

२९३ (४२८)

संवत् १४९६ वर्षे आषाढ सु. ३ गुरौ प्राग्वाटज्ञातीय मं. हेमा भार्या रत्नी पुत्र मं. लाइयाभार्यया मं. पुनादिभिरात्मश्रेयोर्थं श्रीशीतलनाथबिंबं का. उकेशगच्छे श्रीसिद्धाचार्य-संताने प्र. श्रीदेवगुप्तसूरिभिः ।।श्री रस्तु ।।

२९४ (३१०)

संवत् १४९६ वर्षे वदि ६ शनौ श्रीमाल ज्ञा व्य. सामंत सुत चंद्रा भा. ... श्रेयोर्थं श्रीसुमतिनाथबिंबं कारितं प्रतिष्ठितं श्रीहेमरत्न-सूरिभिः ।।

२९५ (४२६)

संवत् १४९७ वर्षे माघ सुदि १० प्राग्वाटज्ञातीय श्रीपत्तनवास्तव्य सं. प्रथमा भार्या पाल्हणदे पुत्र सं. वाछाकेन भार्या लली पुत्र सं. गोधा-मूधा-कर्मण-धर्मणप्रमुखकुटुंबयुतेन निजश्रेयसे श्रीसंभवनाथबिंबं कारितं प्रतिष्ठितं तपागच्छेशश्रीसोमसुंदरसूरिभिः श्रीः ।।

२९६ (१२५३)

सं. १४९७ वर्षे माघ........ १० श्रीमालज्ञातीय श्रे. उभयसी भा. अहिवदे सुत समधर-वेला-भीमादिकुटुंबयुतेन स्वश्रेयोर्थं श्रीपद्मप्रभबिंबं का. प्र. पूर्णिमापक्षे श्रीधर्मप्रभ-सूरिभिः ॥

२९७ (४७८)

संवत् १४९७ वर्षे वै. सु. ३ रामसिणग्रामे प्राग्वाटज्ञातीय व्य. लूणा भा. राजलदे सुत दाऊआकेन भार्या वाहलीयुतेन स्वश्रेयोर्थं श्रीश्रेयांसबिंबं का. प्र. तपाश्रीसोमसुंदर-सूरिभिः

२९८ (२३)

संवत् १४९७ वैशाख सु. १५ऊ...... ज्ञातीय सं. देवराज भा. दुल्हादे पुत्र सं. जेसिहेन प्र. भा. हर्षू सु. माधव राजा द्वि. भा. चांई सु. लज्जाग भ्रातृदेशल पुत्र आंबा गोपा-खीमशी माधवसुतसोनपाल-वानर-वस्तादियुतेनात्मश्रेयसे श्रीमहावीरबिंबं का. प्र. तपा-गच्छेशश्रीसोमसुंदरसूरिपट्टे श्रीमुनिसुंदरसूरिभिः श्रेयो भूयात् श्री ॥

२९९ (१३९९)

सं. १४९७ वर्षे वै. वदि ५ बुधे श्रीमूलसंघे भट्टारक श्रीसकलकीर्तिः हुंबडज्ञातीय सांमतसिग भा. वा........... सरावीरं .... कारितं बिंबं प्रणमति

३०० (५१७)

सं. १४९७ वर्षे वै. व. ९ रवौ श्री श्रीमालज्ञा. श्रे. देवड भा. देवलदे सुत जेसिगेन पितृ-मातृश्रेयसे श्रीधर्म्मनाथबिंबं का. ब्रह्माणगच्छे श्रीवृध्धिसागरसूरिभिः प्र.

३०१ (८७)

संवत् १४९८ वर्षे माह सुदि ४ शनौ श्रीश्रीमालज्ञातीय श्रे. सिघा भार्या सोंगारदे तयोः सुत देपाल श्रेयोर्थं श्रीसुविधिनाथबिबं कारापितं श्रीमदागमगच्छे भट्टा. श्रीमुनि-सिंहसूरिप्रतिष्ठितं श्रीसूरिभिः नुगरवास्तव्य

३०२ (१६४१)

सं. १४९८ वर्षे वैशाख सुद ९ शनौ श्रीमूलसंघे बलको..................
हुंबड ब .... व्य. धर्मसी भा. ....
श्रीआदिनाथपंचपरमेष्ठिबिंबं का. प्रति. ....

३०३ (१२१६)

सं. १४९८ वर्षे प्राग्वाटज्ञातीयव्य धना भा. देउ पुत्र्या राजूनाम्न्या भर्तृकामा-सुतनर्बद-बहिन टबूयुतया श्रीकुंथुनाथबिंबं का. प्र. श्रीसूरिभिः ।।

३०४ (६५५)

सं. १४९९ वर्षे माघ व. ५ रवौ श्रे. देवसी भार्या गाउ सुत श्रे. खेताकेन भा. साज-णिमहितेन श्रीधर्मनाथबिंबं का. प्र. श्रीजयकीर्तिसूरीणामुपदेशेन शिवमस्तु ।।

३०५ (१५१)

संवत् १४९९ वर्षे वै. व. ५ शुक्रे श्रीश्रीमालज्ञा. श्रे. मांडण भा. ढूंसी पुत्र चाचाकेन पितृ श्रेयोर्थं श्रीचन्द्रप्रभस्वामिबिंबं पूर्णिमापक्षे श्रीगुणसमुद्रसूरीणामुपदेशेन कारितं प्रति-ष्ठितं च विधिना ।।

३०६ (१६२१)

सं. १४९९ वर्षे वै. व. ५ पत्तनवास्तव्य श्रीमालज्ञातीय व्यव. मूलासी भा. वानू पुत्र देपालेन स्वभा.वीरीहर्षाय श्रीविमलनाथबिंबं का. प्रति. श्रीसूरिभिः

३०७ (१६४२)

सं. १४९९ वै. व. ५ श्रीमालज्ञा. पत्तनवास्तव्य व्यव. मूलसी भा. वानूनाम्न्या पुत्र-पासा.देपाल. फ.ोफलयुतया स्वश्रेयसे श्रीसंभवनाथबिंबं का. प्रति. श्रीसूरिभिः

३०८ (१८१)

संवत् १४ ....

धाधलदेवि

३०९ (५४८)

सं. १४ ...... म. ला. ......

सा. टाव ....

३१० (३५७)

संवत १४५ वर्षे सा. परिधर टुटेब (?) पुत्र सोनायुतेन पितृव्यपुण्यार्थं श्रीपा-र्श्वनाथबिंबं कारितं प्रतिष्ठितं श्री ....

३११ (८८५)

सं. १४६ ...... वर्षे .... पदगलदे ......

...... श्रीमुनि. बिंबं कारितं श्रीनेमिचंद्रसूरीणामुपदेशेन प्रति.

३१२ (५०८)

संवत् १५०० वर्षे वै. सु. ५ गुरौ श्रीश्रीमालज्ञा. श्रे. भीमा भार्या. राणी सु. डूंगर-महिलाभ्यां पितृ-मातृ पितृ-नाथीमाभ्रातृ रामा-सुगालसर्वपूर्वजश्रेयोर्थं श्रीधर्मनाथबिंबं का. प्र. ब्रह्माणगच्छे श्रीमुणिचंद्रसूरिभिः सिसलग्रामे ।।

३१३ (१३४२)

सं. १५०० वर्षे वै. सु. ५ प्रा. ज्ञा. व्य. जूठिल भार्या तेजू सुत समधरेण भा. हर्षू सुतराजा-साईयादिकुटुंबयुतेन मातृश्रेयसे श्रीकुंथुनाथबिंबं का. प्र. श्रीतपागच्छेशश्रीमुनि-सुंदरसूरिभिः ।।

३१४ (१३३९)

